दिनाङ्क :-20.03.2025

प्रात: - 06:55

<u>अथ वार्ताः</u>

<u>केन्द्रीयशासन योजना निर्णयः</u>

केन्द्रशासनेन अल्पमूल्यपरात्मक- भीम-यूपीआई इति माध्ययेन दीयमान- धनदानादान-प्रोत्साहनाय प्रोत्साहन-योजना स्वीकृता। गतदिन नवदेहल्यां मन्त्रिमण्डल- निर्णायानां विषये वार्ताहर-सभां सम्बोधयनं केन्द्रीयः सूचना-प्रसारण- मन्त्री अश्विनी वैष्णवः प्रोक्तवान यत् एतस्यै योजनायै पञ्चशतं कोटितोऽप्याधिक- सहस्त्र कोटि- मितात्मिका राशिः अनुमोदिता। श्री वैष्णवः प्रतिपादितवान यत् शासनेन असमप्रदेशे नामरूप- स्थले ब्रह्मपुत्र- उपत्यका- उर्वरक निगम-लिमिटेड इत्येतस्य वर्तमान परिसरे नवीन ब्राउनफील्ड- उर्वरक-संयत्रस्य स्थापनायाः निर्णयः स्वीकृतः। असौ प्रोक्तवान यत् संयुक्त-उद्यमस्य माध्यमेन ऋणानुपातः दशसहस्रतोऽ-प्याधिकः भविता। श्री वैष्णवः निगदितवान यत् आर्थिक- प्रकरणानां मन्त्रिमण्डलीय-समित्या महाराष्ट्रे एक्सेस-नियन्त्रित- ग्रीनफील्ड- राष्ट्रिय- राजमार्ग- निर्माणाय अपि स्वीकृतिः प्रदता। केन्द्रशासनेन पशुधन- क्षेत्रे विकाससम्वर्द्धनाय संशोधित- राष्ट्रिय- गोकुल-मिशन इत्येतत्कृते स्वीकृतिः प्रदत्ता।

<u>उद्यम-उत्सवः</u>

राष्ट्रपति- पदासीना द्रौपदी मुर्मुः अद्य राष्ट्रपति- भवनस्थे अमृत-उद्याने समायोज्यमाने उद्यम- उत्सवे भागं गृहणीयात्। एतस्य उद्यम- उत्सव- कार्यक्रमस्य आयोजनं सूक्ष्म- लघु- मध्यम- उद्यम- मन्त्रालयेन अनुष्ठीयते। उद्यम- उत्सवस्य उद्देश्यं देशस्य जीवन्त- निधि- सम्वर्द्धनरूपे सशक्तिकरणं वर्तते। एतस्य कार्यक्रमस्य समापनं मासस्यास्य त्रिंशे दिनांके भविता।

रूस-यूक्रेन-युद्धविरामः

यूक्रेनदेशस्य राष्ट्रपतिः व्लोदिमिर - जेलेंस्की इत्यसौ रूसदेशं विरूध्य प्रर्वतमान- युद्धे आंशिक- युद्ध- विराम- विषये सहमतिं प्रकटितवान्, एतत्सम्बन्धे अमेरिकादेशीयः राष्ट्रपतिः डोनाल्ड- ट्रम्प इत्यसौ अथ रूसदेशीय राष्ट्रपतिः व्लादिमिर पुतिन- इत्यसौ च पारस्परिक- चर्चां कृतवन्तौ। व्हाइट हाउस इत्येतस्य प्रवक्ता निगदितवान यत् चर्चा- बिन्दूनां विषये जेलेंस्की इत्येतस्मै विस्तरेण सूचना प्रदत्ता। व्हाइट हाउस इत्येतस्य प्रवक्ता केरोलिन लेविट इत्यसौ प्रोक्तवान यत् उभौ नेतारौ आंशिक- युद्ध- विराम- विषयै सहमतौ।

स्विस- ओपन- बैडमिन्टन क्रीडा

स्विस- ओपन- बैडमिन्टन क्रीडायां महिलानां प्रागुत्तर- उपनिर्णायकद्वन्द्वे स्विट्जरलैण्ड इत्यत्र बासेल- क्रीडांगणे भारतीयः ट्रीसा जॉली- गायत्री गोपीचन्द अथ जर्मनीदेशीय- सेलिन हब्सच- एमिलि लैहमैन- इति उभयात्मक- दलयोः मध्ये अद्य द्वन्द्वं भविता। इत्येतस्यां प्रतिस्पर्धायां भारतीयदलेन गतदिने स्विट्जरलैण्ड- देशीय- दलं एकविंशति- षोडश, अथ एकविंशतिः सप्तदश- इत्यन्तरालेन पराजितम्।

इति वार्ताः